# संस्कृतम् (केन्द्रिकम्, कोड-सङ्ख्या - 322)
## आदर्श-प्रश्नपत्रम्
## कक्षा - द्वादशी (2025-26)

**अवधिः - होरात्रयम्** | **अङ्कयोजना उत्तरसङ्केताश्च** | **पूर्णाङ्काः - 80**

**अवधातव्यम् -**

1. अङ्कयोजनायां प्रदत्तानि उत्तराणि निदर्शात्मकानि सन्ति। प्रदत्तानि उत्तराणि अतिरिच्यापि सन्दर्भानुसारम् अन्यानि उत्तराणि भवितुम् अर्हन्ति।
2. **आन्तरिकविकल्पात्मकेषु प्रश्नेषु यद्यपि स्पष्टतया निर्देशः दत्तः अस्ति यत् केवलं प्रश्नद्वयम् अथवा प्रश्नत्रयम् इत्यादिकम् उत्तरं दातव्यं तथापि यदि छात्रः अतिरिक्त-प्रश्नानाम् उत्तराणि लिखति तर्हि छात्रहिताय निर्णयः कर्त्तव्यः।** यथा अनुवादकार्ये पञ्चवाक्यानां लेखनम् अभीष्टं परं छात्रः यदि षड् वाक्यानि लिखति तर्हि तत्र केवलं प्रथम-पञ्चवाक्यानां न अपितु यानि वाक्यानि उत्तमानि सन्ति तेषां मूल्याङ्कनं करणीयम्। **(अयं नियमः एकादश्यां कक्षायाम् अपि पालनीयः।)**
3. श्लोके नाट्यांशे वा पृष्टाः प्रश्नाः अवबोधात्मकाः सन्ति। अतः विद्यार्थिनः एतेषु प्रदत्तशब्दानां स्थाने समभाव-पर्यायवाचि-शब्दानां प्रयोगं कर्तुं शक्नुवन्ति। तदर्थम् अङ्काः देयाः। यदि विद्यार्थिनः उत्तरलेखन-समये समुचितानां विभक्तीनां वचनानां च प्रयोगं न कुर्वन्ति तर्हि अंशतः अङ्काः कर्तनीयाः न तु सम्पूर्णाङ्काः।
4. त्रुटिपूर्णवर्तन्यै व्याकरणात्मक-प्रयोगाय च अनुपाततः अङ्काः कर्तनीयाः न तु सम्पूर्णाङ्काः।
5. आंशिक-दृष्ट्या समुचितेभ्यः उत्तरेभ्यः अपि अङ्काः देयाः।
6. रचनात्मक-कार्ये वाक्यरचना प्रमुखा न तु वाक्यसौन्दर्य-तत्त्वम्। अतः आंशिकवाक्यशुद्धये अपि अङ्काः देयाः।

| | | |
|---|---|---|
| | **खण्डः - क**<br>**अपठितावबोधनम् - 10 अङ्काः** | |
| **1.** | **अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानामुत्तराणि संस्कृतेन लिखत -** | **10** |
| | **(अ) एकपदेन उत्तरत -केवलं प्रश्नद्वयम्** | **2×1=2** |
| | (i) शिक्षितानाम्<br>(ii) राघवः<br>(iii) स्वाध्याये | |
| | **(आ) पूर्णवाक्येन उत्तरत - केवलं प्रश्नद्वयम्** | **2×2=4** |
| | (i) राघवस्य अध्ययनं प्रति एतत् समर्पणम् अनुशासनं च तम् आदर्शच्छात्ररूपेण समाजे प्रतिष्ठापयति।<br>(ii) सम्पूर्णया संलग्नतया परिश्रमेण च राघवस्य सर्वेषु विषयेषु उत्कृष्टः परिणामः भवति। | |

| | | |
|---|---|---|
| | (iii) मित्राणि परिवारसदस्याः प्रतिवेशिजनाः च तस्य सफलतां प्रति गर्वम् अनुभवन्ति। | |
| | (इ) अनुच्छेदस्य समुचितं शीर्षकं लिखत।<br>आदर्शच्छात्रः, शिक्षिताः बालाः, अध्ययनशीलता।<br>अन्ये अपि शीर्षकाः भवितुम् अर्हन्ति। | 1×1=1 |
| | (ई) यथानिर्देशम् उत्तरत - | 3×1=3 |
| | (i) (ख) प्रोत्साहितः<br>(ii) (ग) राघवः<br>(iii) (क) परिणामः | |
| | **खण्डः - ख**<br>**रचनात्मककार्यम् - 15 अङ्काः** | |
| 2. | **भवती सौम्या दिल्ली नगरे वसति। भवती एकस्यां पुस्तक-मेलायां भागं गृहीतवती। तदधिकृत्य सखीं तन्वीं प्रति लिखितं पत्रं मञ्जूषायां प्रदत्तशब्दैः रिक्तस्थानानि पूरयित्वा पुनः लिखतु-** | 10×½=5 |
| | तिथिः- .............<br>प्रिये सखि (i) **तन्वि!**<br>सस्नेहं नमो नमः।<br>अत्र कुशलं तत्रास्तु। सहर्षं संसूचयितुमिच्छामि यद् (ii) **गतमासे** अहम् उज्जयिन्याम् (iii) **आयोजितायाम्** एकस्यां विश्वपुस्तक-मेलायां (iv) **भ्रमणार्थं** गता आसम्। तत्र गत्वा मम व्यैयक्तिकः (v) **अनुभवः** एव परिवर्तितः। तत्र अनेकेभ्यः स्थानेभ्यः अनेके प्रकाशकाः समागताः आसन्। विविधविषयकानि (vi) **पुस्तकानि** अपि लभन्ते स्म। तत्रत्यः आकर्षकः दर्शनीयः च विषयः विज्ञान-प्रदर्शनी आसीत्। तस्यां प्रदर्शिन्यां सर्वेपि (vii) **विषयाः** संस्कृतेन प्रदर्शिताः आसन्। तत् सर्वं दृष्ट्वा (viii) **संस्कृतज्ञानं** प्रति मम श्रद्धा इतोऽपि वर्धिता। भवतीम् अहं बहु स्मृतवती। यदि भवति अभविष्यत् तर्हि अधिकः (ix) **आनन्दः** अभविष्यत्। अहं अनेन पत्रेण सह कनिचित् पुस्तकानि चित्राणि च प्रेषयामि अवश्यं पश्यतु तेन सर्वम् अवगमिष्यति। शेषं मिलित्वा चर्चयावः। पित्रोः चरणयोः मम (x) **प्रणामान्** निवेदयतु।<br>भवदीया सखी,<br>सौम्या | |
| 3. अ | अधः प्रदत्तं चित्रम् आधृत्य पञ्चविंशतितः त्रिंशच्छब्दपरिमितैः शब्दैः अनुच्छेदमेकं लिखत - | 5 |
| | अत्र छात्रेभ्यः संक्षिप्तवाक्यरचना अपेक्षिता वर्तते। केवलं वाक्यशुद्धिः द्रष्टव्या। **अस्य प्रश्नस्य प्रमुखम् उद्देश्यं वाक्यरचना भावप्रकटनं च अस्ति।** वाक्यं दीर्घम् अस्ति अथवा लघु इति महत्त्वपूर्णं नास्ति। व्याकरणदृष्ट्या शुद्धतानिमित्तं स्वबुदध्या निर्धारणं करणीयम्। मञ्जूषायां प्रदत्ताः शब्दाः सहायतार्थं सन्ति। छात्रः तेषां वाक्येषु प्रयोगं कुर्यादेव इति अनिवार्यं नास्ति। | |

| | | |
|---|---|---|
| | छात्रः स्वमेधया अपि वाक्यानि निर्मातुं शक्नोति। मञ्जूषायां प्रदत्तानां शब्दानां विभक्तिं परिवर्तनं कृत्वा अपि वाक्यनिर्माणं कर्तुं शक्यते। | |
| | **अथवा** | |
| **आ** | **अधः प्रदत्तं विषयम् आधृत्य पञ्चविंशतितः त्रिंशच्छब्दपरिमितैः शब्दैः अनुच्छेदं लिखत-** | |
| | अयं विकल्पः सर्वेभ्यः अस्ति। छात्राः मञ्जूषायां प्रदत्तानां शब्दानां विभक्तिं परिवर्तनं कृत्वा अपि वाक्यनिर्माणं कर्तुं शक्नुवन्ति। अतः अङ्काः देयाः। अस्य मूल्याङ्कनाय अन्ये नियमाः चित्रवर्णनस्य अनुगुणं पालनीयाः। | |
| **4. अ** | **मञ्जूषाप्रदत्त-पदसहायतया अधोलिखितां कथां पूरयत -** | **10×½=5** |
| | पुरा हिरण्यकशिपुः (i) **नामकः** एकः अहङ्कारी बलिष्ठः च (ii) **राक्षसराजा** अभवत्। सः दैत्यश्चराचरः वर्षसहस्राणि निराहारो ह्यधः शिरः (iii) **परिश्रमेण** परम-तपसा च ब्रह्मदेवं (iv) **प्रसन्नम्** कृत्वा वरमयाचत। ततः ब्रह्मा तस्मै विशिष्टं (v) **वरम्** अयच्छत्- न मनुष्यैः न पशुभिः न दिवा न रात्रौ न गृहे न बहिः न (vi) **शस्त्रेण** नास्त्रेण च मृयेत। अनेन वरेण हिरण्यकशिपुः अजेयः अभवत्। सः देवताः (vii) **पराजित्य** सर्वत्र स्वाधिपत्यम् अस्थापयत्। (viii) **भगवान्** विष्णुः हिरण्यकशिपोः परमशत्रुः आसीत्, यतः विष्णुः (ix) **हिरण्यकशिपोः** भ्रातरं हिरण्याक्षं हत्वा लोकान् रक्षितवान्। तस्मात् (x) **राज्ये** सर्वत्र विष्णोः पूजा नामस्मरणं भजनं च तेन निषिद्धम्।<br>**अथवा** | |
| **आ** | **अधोलिखिते संवादे मञ्जूषायाः सहायतया रिक्तस्थानानि पूरयत -** | |
| | माधवः - मित्र! भवान् क्रीडनाय वाटिकां न आगच्छत्। अपि गृहे सर्वं कुशलम्?<br>रामः - (i) **आम् मित्र! गेहे सर्वं कुशलमेव।**<br>माधवः - तर्हि किमर्थं नागच्छत्?<br>रामः - (ii) **वयं गृहे न आस्म, सर्वेऽपि भ्रमणार्थं वाराणसीम् अगच्छाम।**<br>माधवः - अहो! वाराणसीं सर्वे परिवारजनाः अगच्छन्। बहूत्तमम्। किं किं दृष्टम्?<br>रामः - (iii) **सर्वप्रथमं तु गङ्गास्नानं कृतं पश्चात् च विश्वनाथदर्शनम् अकुर्म।**<br>माधवः - वाराणस्याः विषये बहुधा श्रुतम् अस्ति। किम् अन्वभत् तत्र भवान्?<br>रामः - आनन्दप्रदं नगरं तत्, सर्वेऽपि तत्र चिन्तारहिताः हरहरमहादेव इति वदन्तः व्रजन्ति।<br>माधवः - अहो! अद्भुतं खलु तद् दृश्यम्। किं सायङ्कालस्य गङ्गाघट्टस्य दृश्यम् अवालोकयत्?<br>रामः - (iv) **सत्यम्, अद्भुतं दृश्यं भवति तत्र यदा गङ्गारती भवति तदा जनाः सर्वत्र घट्टे उपविश्य आनन्दिताः भवन्ति।**<br>माधवः - सत्यं वदति, अहम् अत्र विवरणं स्नुत्वैव आनन्दितः भवामि।<br>रामः - भवान् अपि कादापि गच्छतु यतोहि वस्तुतः दर्शनीयं स्थलं तत्।<br>माधवः - (v) **आम् मित्र! परिवारसदस्यैः सह विमर्शं कृत्वा योजनां करिष्यामि। धन्यवादः।**<br>रामः - स्वागतम्, पुनर्मिलामः राम राम! | |

| | | |
|---|---|---|
| | **खण्डः - ग**<br>**अनुप्रयुक्तव्याकरणम्  20 अङ्काः** | |
| 5. अ | **अधोलिखितवाक्येषु रेखाङ्कितपदानां सन्धिं सन्धिच्छेदं वा कृत्वा लिखत-** | 4×1=4 |
| | (क) वेदम् अनूच्य **आचार्यः + अन्तेवासिनम्** अनुशास्ति।<br>(ख) **शैशवेऽभ्यस्त**विद्यानाम्।<br>(ग) तस्य एव वचनात् **भवदभिषेको** निवृत्तः।<br>(घ) अथ क्षणाभ्यन्तरं पुनः स एव **पादध्वनिः + अश्रावि** इति।<br>**अथवा** | |
| आ | **अधोलिखितवाक्येषु रेखाङ्कितपदानां सन्धिं सन्धिच्छेदं वा कृत्वा लिखत-** | 4×1=4 |
| | (क) **विनिर्मितं छादनम्** अज्ञतायाः।<br>(ख) पुरा धाराराज्ये सिन्धुल-सञ्ज्ञो राजा चिरं प्रजाः **परि+अपालयत्**<br>(ग) कोकिलानां मधुरवचांसि श्रुत्वा कस्य **यूनो हृदयम्** उत्कण्ठितं न भविष्यति<br>(घ) दया **भूतेषु + अलोलुप्त्वं** मार्दवं ह्रीरचापलम्। | |
| 6. | **अधोलिखित-वाक्येषु रेखाङ्कितपदानां समुचितं समस्तपदं विग्रहवाक्यं वा प्रदत्तविकल्पेभ्यः चित्वा लिखत -** | 4×1=4 |
| | (i) (ख) शासनस्य पश्चात्<br>(ii) (ग) एकं शरीरं तस्मिन्<br>(iii) (क) आकारसदृशप्रज्ञः<br>(iv) (घ) त्रयाणां वर्गाणां समाहारः तम् | |
| 7. | **अधोलिखित-वाक्येषु रेखाङ्कितपदेषु प्रकृतिप्रत्ययौ संयोज्य विभज्य वा समुचितं रूपं प्रदत्तविकल्पेभ्यः चिनुत -** | 4×1=4 |
| | (i) (घ) प्रष्टव्याः<br>(ii) (क) विद्या + मतुप्<br>(iii) (ख) अवेक्ष्यमाणे<br>(iv) (ग) वसुमत् + ङीप् | |
| 8. | **समुचितं विभक्तियुक्तं पदं प्रदत्तविकल्पेभ्यः चित्वा रिक्तस्थानपूर्तिं कृत्वा लिखत -** | 4×1=4 |
| | (i) (ग) **आचार्याय** प्रियं धनमाहृत्य प्रजातन्तुः मा व्यवच्छेत्सीः ।<br>(ii) हा धिक! (घ) **अस्मान्** अविज्ञाय उपालभसे।<br>(iii) (ख) **शिवप्रसादेन**. भोजः जीवितो भविष्यति।<br>(iv) (क) **भोजनस्य** अन्ते वारि विषापहम्। | |
| 9. अ | **वाच्यानुसारं समुचितैः पदैः रिक्तस्थानानि पूरयित्वा अधोलिखितं संवादं लिखत-** | 4×1=4 |
| | **रामभद्रः** - भोः! नारायण! (i) **श्यामेन** अधुना कुत्र गम्यते? | |

| | | |
|---|---|---|
| | **नारायणः** - किं न जानासि त्वम्? सः पठनाय (ii) **विदेशं** गच्छति।<br>**रामभद्रः** - तेन गृहं पुनः कदा (iii) **आगमिष्यते**?<br>**नारायण** - निश्चयेन अध्ययनं समाप्य एव (iv) **सः** गृहं प्रत्यागमिष्यति।<br>अथवा | |
| आ | वाच्यानुसारं समुचितैः पदैः रिक्तस्थानानि पूरयित्वा अधोलिखितानि वाक्यानि लिखत- | |
| | (i) किं तेन सः **ज्ञायते** ?<br>(ii) **अहं** न जानामि।<br>(iii) गुरुः सर्वान् **शिष्यान्** पाठयति।<br>(iv) शिष्यैः ध्यानेन **पाठाः** पठ्यन्ते। | |
| | **खण्डः - घ भागः - I**<br>**पठितांशावबोधनम् - 25 अङ्काः** | |
| | | |
| 10. | अधोलिखितं गद्यांशं पठित्वा तदाधारितान् प्रश्नान् यथानिर्देशं संस्कृतेन उत्तरत - | 5 |
| | I. एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्) | 2×½=1 |
| | (क) दौवारिकेण/प्रहरिणा<br>(ख) स्कन्धे<br>(ग) तापदुर्गदौवारिकः | |
| | II. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्) | 2×1=2 |
| | (क) क्षम्यतामेष आगच्छामि, आगत्य च निखिलं निवेदयामि" इति कथयन् द्वादशवर्षेण केनापि भिक्षावटुनानुगम्यमानः कोऽपि काषायवासाः धृततुम्बीपात्रः भव्यमूर्तिः संन्यासी दृष्टः।<br>(ख) द्वौवारिकः साक्षेपमवोचत्- "क एष मामनुत्तरयन् मुमूर्षुः समायाति बधिरः?<br>(ग) प्रभुवर्याणामादेशो यद् दौवारिकेण प्रहरिणा वा त्रिःपृष्टोऽपि प्रत्युत्तरमदद् हन्तव्यः इति | |
| | III. (अ) निर्देशानुसारम् उत्तरत - | 2×1=2 |
| | (क) द्वौवारिकः<br>(ख) प्रभुवर्याणाम्<br>अथवा | |
| | (आ) निर्देशानुसारम् उत्तरत -<br>(क) संन्यासी<br>(ख) वदसि | |
| 11. | अधोलिखितं पद्यांशं पठित्वा तदाधारितान् प्रश्नान् यथानिर्देशं संस्कृतेन उत्तरत - | 5 |
| | I. एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्) | 2×½=1 |
| | (क) विधात्रा | |

| | | |
|---|---|---|
| | (ख) मौनम्<br>(ग) विभूषणम् | |
| | II. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्) | 2×1=2 |
| | (क) विधात्रा स्वायत्तमेकान्तगुणं मौनं विनिर्मितम्।<br>(ख) सर्वविदां समाजे मौनं विभूषणम्।<br>(ग) अपण्डितानां विभूषणं मौनम्। | |
| | III. (अ) निर्देशानुसारम् उत्तरत - | 2×1=2 |
| | (क) छादनम्<br>(ख) अपण्डितानाम्<br>अथवा | |
| | (आ) निर्देशानुसारम् उत्तरत -<br>(क) विनिर्मितम्<br>(ख) विधात्रा | |
| 12. | अधोलिखितं नाट्यांशं पठित्वा तदाधारितान् प्रश्नान् यथानिर्देशं संस्कृतेन उत्तरत - | 5 |
| | I. एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्) | 2×½=1 |
| | (क) गृहस्थाश्रमप्रयोगशालायाम्<br>(ख) शत्रुजितः<br>(ग) कुण्डला | |
| | II. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्) | 2×1=2 |
| | (क) ऋतध्वजः प्रष्टुमुत्सहते यत् किं गन्धर्वराजविश्वासु-महाभागाः अपि स्वपत्नीं युधिष्ठिर इव हारितवन्तः। हरिश्चन्द्र इव विक्रीतवन्तः?<br>(ख) एकस्य अपराधेन सर्वा जातिः दण्ड्या इति मदालसायाः विचित्रो न्यायः।<br>(ग) दुर्लभो जनः ईदृशः यः गृहस्थप्रयोगशालायां स्वपत्न्यै स्वतन्त्रतां दद्यात्। | |
| | III. (अ) निर्देशानुसारम् उत्तरत - | 2×1=2 |
| | (क) नारी<br>(ख) स्वतन्त्रताम्<br>अथवा | |
| | (आ) निर्देशानुसारम् उत्तरत -<br>(क) ऋतध्वजाय<br>(ख) अहम् | |
| 13. अ | अधोलिखितस्य पद्यस्य भावार्थं मञ्जूषाप्रदत्तपदैः पूरयित्वा पुनः लिखत - | 3×1=3 |
| | **भावार्थः** - राजा दिलीपः ज्ञाने सत्यपि मौनं (i) **धारयति**, शक्तौ सत्याम् अपि | |

| | | |
|---|---|---|
| | (ii) **अपराधान्** क्षमां करोति, महान्तं त्यागं कृत्वा अपि स्वकीयां (iii) **प्रशंसां** न करोति। एवं राज्ञः दिलीपस्य गुणाः गुणानुसारित्वात् सहोदराः इव सन्ति।<br>**अथवा** | |
| **आ** | **प्रदत्त-भावार्थत्रयात् शुद्धं भावार्थं चित्वा लिखत-** | |
| | (i) त्रिविधं नरकस्येदम्।<br>(ख) नरकस्य द्वारं त्रिविधम् उक्तम् अस्ति।<br>(ii) मान्धाता च महीपतिः कृतयुगालङ्कारभूतो गतः।<br>(क) सत्युयुगस्य आभूषरूपः राजा मान्धाता अपि मरणं प्राप्तवान्।<br>(iii) भूत्यै न प्रमदितव्यम्।<br>(ग) धनसम्पदैश्वर्याय कल्याणाय च प्रमादः (आलस्यम्) न करणीयः। | |
| **14.** | **अधोलिखित- श्लोकस्य प्रदत्ते अन्वये रिक्तस्थानपूर्तिं कुरुत -** | **3×1=3** |
| | **अन्वयः-** दैवी (i) **सम्पत्** विमोक्षाय आसुरी (च) (ii) **निबन्धाय** मता (अतः) पाण्डव ! मा शुचः (यतः) दैवीम् सम्पदम् (iii) **अभिजातः** असि। | |
| **15. अ** | **'क' स्तम्भस्य वाक्यांशस्य 'ख' स्तम्भस्य वाक्यांशेन सह मेलनं कुरुत -** | **4×1=4** |
| | **'क' स्तम्भः** — **'ख' स्तम्भः**<br>(क) यस्याः शक्रसमो भर्ता — (घ) मया पुत्रवती च या।<br>(ख) सेतुर्येन महोदधौ विरचितः — (ग) क्वासौ दशास्यान्तकः।<br>(ग) यदि ते कर्मविचिकित्सा — (क) वृत्तविचिकित्सा वा स्यात्।<br>(घ) दानं दमश्च यज्ञश्च — (ख) स्वाध्यायस्तप आर्जवम्।<br>**अथवा** | |
| **आ** | **अधोलिखितेषु वाक्येषु रेखाङ्कितपदानां प्रसङ्गानुसारं शुद्धम् उत्तरं चित्वा लिखत -** | |
| | (क) यान्यस्माकं **सुकर्माणि** तानि त्वयोपास्यानि।<br>(ख) शरीरे **रिपुः** प्रहरति हृदये स्वजनस्तथा।<br>(ग) त्वया भोजो भुवनेश्वरी-**अरण्ये** रात्रौ हन्तव्यः।<br>(घ) आसुरीं योनिमापन्ना **मूर्खाः** जन्मनि जन्मनि। | |
| | **खण्डः - घ भागः - ii**<br>**सामान्यसंस्कृतसाहित्यपरिचयः 10 अङ्काः** | |
| **16.** | **अधोलिखित-प्रश्नानाम् उत्तराणि लिखत- (केवलं प्रश्नत्रयम्)** | **3×1=3** |
| | (क) "श्रीमद्भगवद्गीतायाः" **कार्याकार्यव्यवस्थितिः** पाठः सङ्कलितः।<br>(ख) " मातुराज्ञा गरीयसी " इति पाठः **प्रतिमानाटकात्** सङ्कलितः।<br>(ग) " पुरन्ध्रीपञ्चकम्" इत्यस्याः रचनायाः लेखिका **आचार्यावेदकुमारीघई**। | |

| | | |
|---|---|---|
| | (घ) "नैकेनापि समं गता वसुमती" इत्यस्य पाठस्य सन्दर्भग्रन्थः भोजप्रबन्धः। | |
| 17. | **मञ्जूषायाः समुचितं पदं चित्वा रिक्तस्थानानि पूरयत - (केवलं प्रश्नत्रयम्)** | 3×1=3 |
| | (क) महाकाव्ये न्यूनातिन्यूनम् **अष्ट** सर्गाः भवन्ति। ।<br>(ख) उदिते **नैषधे** काव्ये क्व माघः क्व च भारविः।<br>(ग) रघुवंशम् इति महाकाव्यं **कालिदासेन** विरचितम्।<br>(घ) सर्गबद्धा रचना **महाकाव्यं** कथ्यते। | |
| 18. | **समुचितं मेलयित्वा लिखत -** | 4×1=4 |
| | **भाग क** — **भाग ख**<br>(क) श्रीहर्षः — (घ) नैषधीयचरितम्<br>(ख) प्रतिमानाटकम् — (क) भासः<br>(ग) भरत-मुनिः — (ख) नाट्य-शास्त्रम्<br>(घ) अभिज्ञानशाकुन्तलम् — (ग) कालिदासः | |

--------00000-------